# मेधा सूक्तम्

ॐ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय। ॐ शन्तिः शन्तिः शन्तिः॥

ॐ मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना। त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया। त्वया जुष्टश्चित्रं विन्दते वसु सानो जुषस्व द्रविणो न मेधे॥
मेधां म इन्द्रो ददातु मेधां देवी सरस्वती। मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा। अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः। दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताꣳ स्वाहा॥

आमां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम्।
मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु।

ॐ वाक्देव्यै च विद्महे ब्रह्मपत्नी च धीमहि। तन्नः सरस्वती प्रचोदयात्। ॐ हंस हंसाय विद्महे परमहंसाय धीमहि। तन्नो हंसः प्रचोदयात्। ॐ शन्तिः शन्तिः शन्तिः॥

## Medhā Sūktam

om yaśchandasāmṛṣabho viśvarūpaḥ| chandobhyo'dhyamṛtāthsambabhūva| sa mendro medhayā spṛṇotu| amṛtasya devadhāraṇo bhūyāsam| śarīraṁ me vicarṣaṇam| jihvā me madhumattamā| karṇābhyāṁ bhūriviśruvam| brahmaṇaḥ kośo'si medhayā pihitaḥ|
śrutaṁ me gopāya| om śantiḥ śantiḥ śantiḥ ||

om medhādevī juṣamāṇā na āgādviśvācī bhadrā sumanasyamānā| tvayā juṣṭā nudamānā duruktān bṛhadvadema vidathe suvīrāḥ| tvayā juṣṭa ṛṣirbhavati devi tvayā brahmā''gataśrīruta tvayā| tvayā juṣṭaścitraṁ vindate vasu sāno juṣasva draviṇo na medhe||

medhāṁ ma indro dadātu medhāṁ devī sarasvatī| medhāṁ me aśvināvubhāvādhattāṁ puṣkarasrajā| apsarāsu ca yā medhā gandharveṣu ca yanmanaḥ| daivīṁ medhā sarasvatī sā māṁ medhā surabhirjuṣatāṁ svāhā||

āmāṁ medhā surabhirviśvarūpā hiraṇyavarṇā jagatī jagamyā| ūrjasvatī payasā pinvamānā sā māṁ medhā supratīkā juṣantām|

mayi medhāṁ mayi prajāṁ mayyagnistejo dadhātu mayi medhāṁ mayi prajāṁ mayīndra indriyaṁ dadhātu mayi medhāṁ mayi prajāṁ mayi sūryo bhrājo dadhātu|

om vākdevyai ca vidmahe brahmapatnī ca dhīmahi| tannaḥ sarasvatī pracodayāt|
om haṁsa haṁsāya vidmahe paramahaṁsāya dhīmahi| tanno haṁsaḥ pracodayāt|
om śantiḥ śantiḥ śantiḥ ||